Shri Raghunatha Temple MSS. Library, JAMMU

No. ५०८३ घ

Title चरणव्यूहः

Author

Extent ३

Subject धर्मशास्त्रम् सम्पूर्णम्

नं० ५०९३-घ

चरणव्यूह: (धर्मशास्त्रम्)

पत्राणि ३ (त्रीणि) (संपूर्णम्)

५०९३-घ

50.93/3

श्रीराम अथातश्चरणव्यूहं व्याख्यास्यामस्तत्रनिरुक्तं चातुर्विध्यं चतुरोवेदाविज्ञातानिभवंति ऋग्वे
दो यजुर्वेदः सामवेदो ऽथर्ववेदश्चेति तत्र ऋग्वेदस्याष्टस्थानानि भवंति चर्चाश्रावकश्चर्च
कः श्रवणीयपारः क्रमपारः क्रमचरः क्रमजटः क्रमदंडश्चेति चतुष्पारायणमेतेषां शा
खाः पंचविधा भवंति शाकला बाष्कला आश्वलायनाः शांखायना मांडूकायनाश्चेति ते
षामध्ययनमध्यायाश्चतुःषष्टिर्मंडलानि दशैवचैक यर्चएकवर्गएकश्चानेवकस्तथा द्वौ
वर्गौ ऋचोऽनेया त्रीणि त्वेशतसप्तत वर्गाणां परिसंख्याता द्वे सहस्रे चतुरुत्तरे ऋचां
दशसहस्राणि ऋचां पंचशतानि च ऋचामशीति पादश्चैतत्पारायणमुच्यते यजुर्वेदस्य
षडशीतिर्भेदा भवंति तत्र चरका नाम द्वादशभेदा भवंति चरका आह्वरकाः कठाः
प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वारायणीया वार्तंतवीयाश्चेति श्वेताश्वतरा औपमन्यवः पाता
ण्डिनेया मैत्रायणीयाश्चेति तत्र मैत्रायणीयानामष्टामायनीयाश्चेति तेषामध्य
यनं द्वेसहस्रशते न्यूने मंत्रे वाजसनेयके ऋग्गणः परिसंख्यातं ततोन्यानि
यजूंषि चाष्टौ शतानि सहस्राणि चाष्टाविंशतिरन्यान्यधिकस्य पादमेत

च. व्यू.

१

ष्यमाणां यजुर्वाह्निके यत्नं समाम्नायि [illegible] संसभुक्ति यं ब्राह्मणानां चत्वार्य्यनुगुणंति
चतेत्तिरीयानामष्टि भेदा भवंति तेत्तिरीयारवांडिके याभ्योति तत्रारवांडिके यामा
म पंच भेदा भवंति कालेता शाखायनी हिरण्यकेशी भारद्वाजापस्तंबश्चेति ते
षामध्ययनमष्टादशयजुःसहस्राण्यधीत्य शाखापारो भवंति तान्येवाद्विगुणा
न्यधीत्य पदपारो भवंति तान्येव त्रिगुणान्यधीत्य क्रमपारो भवंति षडंगान्य
धीत्य षडंगविद्भवति त्रिगुणां पठ्यते यत्र मंत्रब्राह्मणयोः सह यजुर्वेदः स
विज्ञेयः शेषाः शाखांतराः स्मृताः शिक्षा कल्पो व्याकरणं निरुक्तं छंदो ज्यो
तिषमितिषडंगानि छंदः पादो तु वेदस्य हस्तौ कल्पोथ पठ्यते ज्योतिषामय
नं चक्षुर्निरुक्तं श्रोत्रमुच्यते शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं त
स्मात्सांगमधीत्यैव ब्रह्मलोके महीयते तथा [illegible] प्रातिपदमनुपदं छंदो भाषा
धर्म मीमांसा न्यायस्तर्क इत्युपांगानि तत्रयाः शिक्षा नि भवंति उपलक्षणं
धागलक्षणं प्रातिशाख्यानुवाकः संख्या चरणव्यूह श्राद्ध कल्प शुल्व कानि
पार्षदम्याय जूषं [illegible] पीठा प्रणं प्रवराध्यायोथ शास्त्रं [illegible] संख्या निग

रामः

मायणपार्श्वहोत्रिकं [illegible] सवोग्यानेकूर्मलक्षणमित्यष्टादशपरिशिष्टानि भवंति तत्र कंठानां येगा
यर्नादिशेषस्तत्र प्राच्योदीच्यनैऋत्यवाजसनेयानामष्टपंचदशभेदा भवंति जाबाला बौ
धायना काण्वा माध्यंदिनीया शापेया स्तापनीया: कपोला पौंड्रवत्सा आवटिका
पर:मावटिका पाराशरा वैणेया वैधेया अद्धा बौधेया भवंति तेषामध्ययनं सो
क्लिबं प्रवचनीयं भवंति मंत्रब्राह्मणाकल्पा नां षंगानां यजुषा मृचां च सामाय: प्रतिभा
गकृत: सौध्वर्युः कृत्स्न उच्यते सामवेदस्य किल सहस्रमासीत् तेषामध्यायेषु धीयानास्ते
शतक्रतुर्वज्रेणाभिहता: शेषान् व्याख्यास्यामः वेदस्य राणायनीया नाम सप्त भेदा
भवंति राणायनीया शाट्यमुग्र्या कालेया महाकालेया लांगलायना शार्दूलाकौ
थुमा भवंति तत्र कौथुमा नाम षड्भेदा भवंति आसुरायणा वातायना प्रांजलिनैकभृता
प्राचीनयोग्या नैगेया कौथुमा भवंति नैगेया मत्स्यशारीरी तिस्रा तथाऽजेयं पाशमानं चतुःशतमे
कं नवबहूनि तानि सामानि सामगास्ता संख्या गायत्रा प्रतरो भवति शिक्षा नाम षष्ठ्याय शति
काम भवंति तत्र त्रयो चित्रमुनस्कंतं साम तत्र त्वंसं शाधान्न नरकं सि तिविधीयते अष्टौ सामस
हस्राणि सामानि चत्वारि दश शाखाशे शतानि नवति ई शति सवालखिल्या: ससुपर्णी

त्रिंशत्सहस्रमारण्यकानि सोपरिशिष्टमन्त्राब्राह्मणं स्मृतं २ अथर्ववेदस्य नव भेदा भवंति पिप्पलादा मौ
दा स्तौदा शौनकीया जाजला जलदा ब्रह्मवदा देवदर्शी चारणविद्याश्चेति तेषा
मध्ययनं द्वादशवर्षसहस्राणि पंचकल्पानि भवंति कल्पेकल्पे पंचशतानि भवंति नक्षत्रक
ल्पो विधानकल्पः संहिताविधेरभिचारकल्पः शांतिकल्पश्चेति कल्पश्चेति नवमे वेदानां
मुपवेदा भवंति ऋग्वेदस्यायुर्वेद उपवेदो यजुर्वेदस्य धनुर्वेद उपवेदः सामवेदस्य गांध
र्ववेद उपवेदो थर्ववेदस्यार्थशास्त्रं चेत्याह भगवान् व्यासः स्कंदो वा यदि मे ३ वेदा भवंत्याह
स्त्वा मे फेकस्य का हृशां रूपवर्णौ विधीयते ऋग्वेदस्य पद्मपत्राक्षः अतिविभक्तग्रीवः कुंचि
तकेशाः समश्रुः स्थैर्यवती मनुष्कीर्तिमन्नमाणो नावतिष्ठत्यपि तस्यान्वेषच यजुर्वेदस्य
पिंगाक्षः कृशमध्यस्थूलगलकपोल ताम्रायतवर्णः कृष्णवर्णो मात्रादेशमात्रश्च षड्
दीर्घत्वेन सामवेदस्य नित्यं स्वग्वी शुचिर्यतः शुचिवासाः समो दान्तो बृहच्छरीरः
शमीदंडी कातरनयन आदित्यवर्णो धीरो न नवरत्निमात्रो थर्ववेदस्य तीक्ष्णप्रचंड
कामरूपी विश्वात्मा धिष्ठकर्मा क्षुद्रकर्मा स्त्रियाचार्य ध्यायी प्राज्ञस्य महामीनो मल
वर्णो वर्णो निरस्तदारात्मा मात्र ऋग्वेदस्यात्रेयसगोत्रं सोमदैवत्यं गायत्री छंदस्का २

यजुर्वेदस्य काश्यपगोत्रमिंद्रदैवत्यं त्रिष्टुप छंदः सामवेदस्य भारद्वाजगोत्रं रुद्रदैवतं जगती छंदो
अथर्ववेदस्य वैतानगोत्रं ब्रह्मदैवत्यमनुष्टुप् छंदो यश्चेमवेदानां नामरूपं गोत्रं प्रमाणं
छंदो दैवतं वर्णं चरणं वेत्ति आधि यो लभते विद्यां जातिस्मरो यजायते जन्मे जन्मे वे
दपारगो भवति जन्मानि जन्मानि वेदपारगो भवति अप्रजी प्रजी भवति अ
ब्रह्मचारी ब्रह्मचारी भवति नमः शौनकाय नमः शौनकाय यइदं चरणव्यूहं
गर्भिणीं श्रावयेत् स्त्रियं पुमांसं जायते पुत्र ऋषिभिर्वेदपारगो भवति यइदं
चरणव्यूहं श्राद्धकाले पठेद्विजः अक्षय्यं जायते श्राद्धं पितृणां चैवोपतिष्ठति यइ
दं चरणव्यूहं पठन्स्तु लोके पावन तारयेत्प्रभृतीन्पुत्रान् पुरुषः सप्तसप्तान
यइदं चरणव्यूहं पठेत्सर्वसु पर्वसु विधूतपाप्मा हिते स्वर्गे ब्रह्मभूयाय गच्छति
ब्रह्मभूयाय गच्छति इति श्री चरणव्यूहः समाप्तः शुभं भवतु ॥ २

श्रीगणेशाय नमः ॥ ॐ अस्य श्रीगायत्रीकवचमंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्वाणि छंदांसि ब्रह्म

वेदांग ९६